अङ्गुष्ठमात्राण्येतानि द्व्यङ्गुष्ठं वक्त्र उच्यते ॥ अङ्गुष्ठमात्रं हृदयं त्र्यङ्गुष्ठमुदरं स्मृतम् । एकाङ्गुष्ठा कटिर्ज्ञेया द्वौ वस्तिर्द्वौ च गुह्यकम् ॥ ऊरू जङ्घे च पादौ च चतुस्त्र्येकैर्यथाक्रमम् । अरण्यवयवा ह्येते याज्ञिकैः परिकीर्त्तिताः ॥ यत्तद्गुह्यमिति प्रोक्तं देवयोनिस्तु सोच्यते । अस्यां यो जायते वह्निः स कल्याणकृदुच्यते ॥ अन्येषु ये तु मथ्नन्ति ते रोगभयमाप्नुयुः । प्रथमे मन्थने त्वेष नियमो नोत्तरेषु च ॥ उत्तरारणिनिष्पन्नः प्रमन्थः सर्व्वदा भवेत् । योनिसङ्करदोषेण युज्यते ह्यन्यमन्थकृत् ॥ आर्द्रा सशुषिरा चैव घूर्णाङ्गी पाटिता तथा । न हिता यजमानानामरणिश्चोत्तरारणिः ॥ परिधायाऽहतं वासः प्रावृत्य च यथाविधि । बिभ्टयात् प्राङ्मुखो यन्त्रमावृता वक्ष्यमाणया ॥ चत्रबुध्नप्रमन्थाग्रं गाढं कृत्वा विचक्षणः । कृत्वोत्तराग्रामरणिं तद्बुध्नमुपरि न्यसेत् ॥ चत्राधः कीलकाग्रस्थामोविलीमुदगग्रकाम् । विष्टम्भाद्धारयेद् यन्त्रं निष्कम्पं प्रयतः शुचिः" इति कात्या० स० ॥

**अग्न्युपस्थान** न० अग्निरुपस्थीयतेऽनेन उप+स्था ल्युट् ६त०। वह्नेरुपासनमन्त्रे। स्त्रियां ङीप्। भावे ल्युट् ६त० । वह्नेरुपासने न० ।

**अग्र** न० अङ्ग–रक् नलोपः । उपरिभागे, शेषभागे, आलम्बने पूर्व्वभागे, उत्कर्षे समूहे च । प्रधाने, अधिके, प्रथमे च त्रि० । तत्र पूर्व्वभागे अग्रकायः "अथाग्रहस्ते मुकुलीकृताङ्गुलाविति" कुमा० । ऊर्द्ध्वे "शृङ्गाणि यस्याग्रसरोरुहाणि इति" कु० । आलम्बने, "मनुमेकाग्रमासीनमिति" मनुः प्रधाने "अथाग्रमहिषी राज्ञ" इति प्रथमे अग्रहायणेष्टिरिति। पुरोऽर्थे, अग्रसरः । शेषभागे, "हर्म्याग्रसंरूढेषु तृणाङ्कुरेष्विति" रघुः । "सूच्यग्रेण न दातव्यं विना युद्धेन केशवेति" "बालाग्रशतभागस्य शतधा कल्पितस्य चेति" "आराग्रमात्रो ह्यपरोऽपि दृष्टः इति" च श्रुतिः । अधिके "अथाग्रयशालिनेति" । शृङ्गे, "कैलासाग्रसमासीनमिति" तन्त्रम् उत्कर्षे, अग्रादग्रं रोहतीति ता० ब्रा० अग्रमुत्कर्षमिति माधवाचार्य्यः अधिके "साग्रं वर्षशतमिति" रामा० अक्षक्षेत्रपलपरिमाणे (ज्योतिषोक्तस्य अक्षक्षेत्रपलस्य परिमाणार्थेऽंशभेदे) च । अक्षक्षेत्रसाधनार्थायां सिद्धान्तशिरोमण्युक्तायाम् अक्षक्षेत्रकर्णेन गुणितायां स्वकोट्या हृतायां क्रान्तिज्यायां स्त्री । "क्रान्तिज्यके कर्णगुणे विभक्ते कोट्या भुजेनाग्रमिताग्रका स्यात्" इति सि० शि० । "क्रान्तिज्या अक्षश्रुतिकर्णेन गुणिता द्विः स्थाप्या एकत्र स्वकोट्या भक्ता सती अग्रा भवतीति" प्रमिता० । "रेखा प्राच्यपरा साध्या विषुवद्भाग्रगा तथा । इष्टच्छायाविषुवतोर्मध्यमग्राभिधीयते" इति सूर्य्यसिद्धान्तपारिभाषितेऽर्थे च स्त्री । विवृतञ्चैतत् रङ्गनाथेन यथा "अथाग्राज्ञानार्थमाह । तस्मिंश्चतुरस्रे पूर्वापररेखात उत्तरभागे विषुवद्भाग्रगा तद्भागप्रदेशस्थाक्षभाङ्गुलान्तरितेत्यर्थः । प्राच्यपरा रेखा पूर्व्वापररेखानुकारा रेखा तथा सर्वतस्तुल्यान्तरेण यथेष्टच्छायाक्षरेखाभुजान्तरेण कार्य्या । अनन्तरमिष्टच्छायाविषुवतोरिष्टच्छायाक्षरेखाक्षभाग्ररेखयोरित्यर्थः । मध्यं चतुरस्रेऽङ्गुलात्मकमन्तरालं सर्वतस्तुल्यम् । अग्रा कर्णवृत्ताग्रोच्यते । अत्रोपपत्तिः । भुजस्य कर्णवृत्ताग्रा पलभासंस्कारेणाग्रा उक्ता तद्दक्षिणगोले पलभाधिकोत्तरभुजसद्भावेन पलभोनो भुजोऽग्रेति, प्राच्यपरस्त्रत्वादुत्तरभागेऽक्षभाग्ररेखा भुजमध्ये भवतीति द्वयो रेखयोरन्तरमग्रा पलभोनभुजरूपा । एवमुत्तरगोल उत्तरभुजस्य पलभाल्पत्वाद्भुजोनपलभाग्रेति पलभारेखा प्राच्यपरस्त्रत्वादुत्तरभागस्था भुजरेखातोऽप्यग्रान्तरेणोत्तरदिशीति द्वयो रेखयोरन्तरं भुजोनपलभारूपं कर्णवृत्ताग्रा । एवं दक्षिणभुजस्य पलभोनाग्रात्वात् पलभायुतोऽग्रेति प्राच्यपरस्त्रत्वाद्भुजाग्रापलभाग्रारेखयोः क्रमेण याम्योत्तरत्वात् तयोरन्तरालं पलभाभुजैक्यरूपमग्रा पलभायाः शङ्कुतलानुकल्पत्वात् सदोत्तरत्वं छायासम्बन्धादुक्तम्" इति । "अग्रशब्दस्यावयवरूपैकदेशपरत्वे हस्ताग्रं तद्वत्परत्वे अग्रहस्त" इति यथोक्तम् वामनेन, "हस्ताग्राग्रहस्तयोर्गुणगुणिनोर्भेदादिति" । अग्र+भवाद्यर्थे यत् । अग्र्यः । घ अग्रियम् । कुशाग्रमिव च । कुशाग्रीयः । इवार्थे शाखादि० य अग्र्यः ॥ अग्रः ऋषिभेदस्तद्गोत्रापत्ये नडादि० फक् । आग्रायणः । तत्तदर्थेषु । [वत् कर्म्म० । देहपूर्व्वभागे ।

**अग्रकाय** पु० अग्रः कायः अवयवावयविनोरभेदात् अग्रहस्त-

**अग्रग** त्रि० अग्रे गच्छतीति गम–ड ७त० । पुरोगामिनि ।

**अग्रगण्य** त्रि० अग्रे गण्यते गण–यत् ७त० । अग्रगणनीये, प्रधाने च ।

**अग्रगामिन्** त्रि० अग्रे गच्छति गम–णिनि ७त० । पुरोगामिनि । "प्रष्ठोऽग्रगामिनीति" पा० । अत्रणत्वनिर्देशात् अग्रगामिनेत्यादौ न णत्वम् । स्त्रियां ङीप् ।

**अग्रज** पु० अग्रे पुरस्तात् जायते जन–ड । अग्रजाते ज्येष्ठभ्रातरि "जगादाग्रे गजाग्रजम्" इति माघः ।